**त्रिलौही** स्त्री त्रीणि लौहानि साधनत्वेनास्त्यस्याः गौरा० ङीष् । सुवर्णरजतताम्रपरिमाणभेदेन निर्मिते मुद्राभेदे "अथ मन्त्रिणां हितार्थाय त्रिलौही मुद्रा निरूप्यते । सोमसूर्य्याग्निरूपाः सुवर्णा लौहत्रयं तथा । रौप्यमिन्दुः स्मृतो हेम सूर्य्यस्ताम्रो हुताशनः । लौहभागाः समुद्दिष्टाः स्वराश्चरसंख्यया । तैर्लौहैः कारयेन्मुद्रामसङ्कुलितसङ्गताम् । एषु स्वराः स्मृताः सौम्याः स्पर्शाः सौराः शुभोदयाः । आग्नेया व्यापकाः सर्वे सोमसूर्य्याग्निदेवताः । स्वराः षोडश विख्याताः स्पर्शाः स्युः पञ्चविंशतिः। व्यापका दश ते कामधनधर्मप्रदायिनः । साष्टं सहस्रं संजप्य मुद्रां तां जुहुयात्ततः । तस्यां सम्पातयेन्मन्त्री सर्पिषा पूर्वसंख्यया । निःक्षिप्य कुम्भे तां मुद्रामभिषेकोक्तवर्त्मना । आवाह्य पूजयेद्देवीमुपचारैर्विधानतः । अभिषिच्य विनीताय दद्यात्तां मुद्रिकां गुरुः । इयं मुद्रा क्षुद्ररोगविषमज्वरनाशिनी । व्यालचौरमृगादिभ्यो रक्षां कुर्य्याद्विशेषतः । युद्धे विजयमाप्नोति धारयन् मनुजेश्वरः । मन्त्रसिद्धिकरी पुंसां चतुर्वर्गफलप्रदा । धारयन् मनुजो नित्यं देवतुल्यो भवेद्भुवि" तन्त्रसा०।

**त्रिवत्स** पु० । त्रयो वत्सा वत्सरा वयोयस्य पृषो० । त्रिवर्षवयस्के वृषे । स्त्रियां तु टाप् त्रिवत्सा । "त्रिवत्सश्च मे त्रिवत्सा च मे" यजु० १८।२६। "वत्सो वत्सरः त्रयो वत्सा यस्य स त्रिवत्सः त्रिवर्षो वृषः तादृशी गौस्त्रिवत्सा" वेददी० । "सोमक्रयणस्त्रिवत्सः साण्डः" कात्या० श्रौ० २२।२।४० । "त्रिवत्सस्त्रिवर्षः साण्डः अण्डसंयुक्त ऋषभः" कर्कः ।

**त्रिवर्ग** पु० त्रयाणां धर्मार्थकामानां वर्गः । १धर्मार्थकामरूपेषु पुरुषार्थेषु, अमरः २त्रिफलायां,३कटुत्रिके, मेदिनि० साङ्ख्योक्ते ४सत्त्वरजस्तमोरूपगुणत्रये । "क्षयःस्थानं च वृद्धिश्च त्रिवर्गो नीतिवेदिनाम्" अमरोक्ते राज्ञामायव्ययवृद्धिरूपेषु ५पदार्थेषु च । "त्रिवर्गपारीणमसौ भवन्तम्" भट्टिः । "धर्मार्थावुच्यते श्रेयः कामार्थौ धर्म एव च । अर्थ एवेह वा श्रेयस्त्रिवर्ग इति तु स्थितिः" । "तं राजा प्रणयन् सम्यक् त्रिवर्गेणाभिवर्द्धते" मनुः ।

**त्रिवर्णक** न० त्रयो वर्णाः पुष्पेऽस्य कप् । १गोक्षुरे । २त्रिफलायां, ३त्रिकटौ । समा० द्वि० पात्रा० स्वार्थे कन् । ४ब्राह्मणक्षत्रियवैश्यरूपे द्विजातिवर्णत्रये न० मेदि० । ५श्यामरक्तपीतात्मके वर्णत्रये च ।

**त्रिवर्त्तु** न० त्रिषु वसन्तादिषु ऋतुषु वर्त्तते वृत–तुन् । वसन्तादिके ऋतुत्रये प्रातरादिकाले अतिशयेन वर्त्तमाने आदित्यतेजसि । "त्रीणि वा आदित्यस्य तेजांसि वसन्ते प्रातर्ग्रीष्मे मध्यन्दिने शरद्यपराह्णे" इति श्रुतेस्तस्य वसन्तादिषु प्रातरादिकालभेदेऽतिशयेन वर्त्तमानत्वात् तथात्वम्" "त्रिवर्त्तु ज्योतिःस्वभिष्ट्य स्मे" ऋ० ७।१०।१।२ "त्रिवर्त्तु त्रिष्वृतुष्वतिशयेन वर्त्तमानम्" भा० ।

**त्रिवर्त्मन्** पु० त्रीणि वर्त्मान्यस्य । देवयानपितृयानदक्षिणायानरूपमार्गत्रययुक्ते जीवे "स विश्वरूपस्त्रिगुणस्त्रिवर्त्मा प्राणाधिपः स करोति स्वकर्मभिः" श्वेता० ५।७। त्रीणि वर्त्मानि देवयानादयो मार्गभेदा अस्येति त्रिवर्त्मा धर्माधर्मज्ञानमार्गभेदान् अर्हति वा" भा० २गङ्गायां स्त्री । त्रिगुणितं वर्त्म । ३स्वर्गमर्त्त्यपातालरूपे मार्गे "जह्नोर्वितीर्णां महापुण्यां मधुवर्तीं त्रिवर्त्मगाम्" । भा०आनु० २६अ० ।

**त्रिवर्ष** त्रि० त्रयो वर्षा वयोऽस्य । त्रिवर्षवयस्के १प्राणिनि । "न त्रिवर्षस्य कर्तव्या बान्धवैरुदकक्रिया" मनुः ।२त्रिहायण्यां गवि स्त्री "त्रिहायणी त्रिवर्षा गौः" अमरः । स्वार्थे क । त्रिवर्षिका तत्रार्थे । त्रिगुणितो वर्षः शा०त० । ३वर्षत्रये पु० न० "न मिद्ध्यत्यर्हितं वाढं त्रिवर्षं वपनस्य च" सुश्रुतः ।

**त्रिवर्षीय** त्रि० त्रिवर्षे भवः गहा० छ । त्रिवर्षभवे "एकैकं वै त्रिवर्षीयं तेन पीवान् शुना सह" भा० आनु० ६३अ०

**त्रिवार** त्रि०त्रयो वारा अस्य ।१वारत्रययुक्ते ।२गरुडात्मजभेदे पु० । "त्रिवारः सप्तवारश्च वाल्मीकिर्दीपकस्तथा" भा० उ० १०० अ० गरुडात्मजोक्तौ ।

**त्रिविक्रम** पु० त्रयो विक्रमाः पादन्यासा अस्य । १विष्णौ अमरः त्रिक्रमशब्दे दृश्यम् । "आनन्दो नन्दनानन्दः सत्यधर्मस्त्रिविक्रमः"विष्णुस०। "त्रयो विक्रमास्त्रिषु लोकेषु विक्रमः क्रान्तं यस्य स त्रिविक्रमः "त्रीणि पदानि विचक्रमे" श्रुतेः त्रयो लोका विक्रमाः क्रान्ता येनेति वा । "त्रिरित्येवं त्रयो लोकाः कीर्तिता मुनिसत्तमैः । क्रमते तांस्त्रथा सर्वांस्त्रिविक्रमो जनार्द्दन !" विष्णुसं० भाष्यधृतहरिवं०वाक्ये तन्नाम निरुक्तिर्दर्शिता । इत० । २लोकत्रयक्रमणे पु० "त्रिविक्रमे यथा विष्णुः सर्वदैत्यवधे पुरा" रामा० लं० ७८ अ० ।

**त्रिविद्य** पु०तिस्रो विद्या अस्य । त्रिवेदज्ञे द्विजे ।

**त्रिविध** त्रि० तिस्रो विधा अस्य । त्रिप्रकारे "अथ त्रिविध-